divisible and unique essence अखण्डैकरसानन्दकरे…।स्वच्छन्दस्फुरणामत्र निधेह्य-कुलनायिके ParaśuKS. 3. 28 (110. 16); अखण्डैकरसानन्दाकरे… । स्वच्छन्दस्फुरणा-मत्र निधेहि कुलरूपिणि MahNirvāT. 6. 38; KulārT. 6. 50.

**अखण्डैकरसार्थम्** ( akhaṇḍaikarasārtham ) *adv.* for (attaining) the indivisible unique essence पदत्रयभूमिं स्वरूपलक्षणमखण्डैकरसं ब्रह्म बृंहतेर्धात्वर्थं-भूतं ( v. l. अखण्डैकरसार्थम् ) सर्वैर्मुमुक्षुभिरुपासनीयम् S'aṅkaVi.(Ā.) 86. 2.

**अखण्डैकरूपत्व** ( akhaṇḍaikarūpa–tva ) *n.* the state of being of one indivisible form सदानन्दरूपयोरखण्डैकरूपत्वेन सदात्मनावरणाभिभवे आनन्दात्मनापि तदाभिभवसंभवात् GuruCandr. i. 176. 15.

**अखण्डैकादशी** ( akhaṇḍaikādaśī ) *f.* the eleventh day of a lunar fortnight, (on which a fast is to be observed, with the dropping af a meal on the previous night and the succeeding noon) ब्रह्मन्नखण्डैकादश्या विधिं सम्यक्समादिश SkandP. ii(5). 12. 19; अखण्डैकादशीव्रतम् । दशम्यां चैव नक्तं च एकादश्यामुपोषणम् । द्वादश्यामेकभुक्तं च अखण्डा इति कथ्यते SkandP. ii(5). 12. 22.

**अखण्डैकादिक** (akhaṇḍaikādi–ka) *adj.* (a *mantra* or a sacred formula) beginning with (the phrase) *akhaṇḍaika* (i. e. 'akhaṇḍaikarasānandākare' etc. KulārT. 6. 50); मातृकाश्चाप्यखण्डेन्द्वा( ? ण्डैका )दिकान् मनून् ।…संस्मृत्या-भ्यर्च्य पात्रन्तु पूजयेत् KulārT. 6. 59.

**अखण्डैक्य** ( akhaṇḍaikya ) *n.* indivisible oneness, absolute unity ब्रह्मत्वविशिष्टे सत्त्वसंबन्धश्च चतुर्धा उक्तेषु सामानाधिकरण्येष्वभेदे सामानाधिकरण्य-स्याखण्डैक्यपर्यवसानात् GuruCandr. i. 483. 15; ii. 290. 1; अत्यन्ताभेदो ह्यखण्डैक्य-रूपो मुख्यं सामानाधिकरण्यम् LaCandr. 510. 26; 358. 22; अभेदपरे अखण्डैक्यपरे LaCandr. 830. 36.

**अखण्डोक्तव्यक्ति** ( akhaṇḍokta–vyakti ) *f.* the said indivisible individual भेदमात्रज्ञानं चाखण्डोक्तव्यक्तिप्रमोच्छेद्यम् GuruCandr. ii. 256. 20; LaCandr. 521. 5.

**अखण्डोपकार** ( akhaṇḍopakāra ) *m.* the collective help प्रयाजादीनां स्वस्वोपकारेषु नैरपेक्ष्यसंभवेऽपि नैकार्थ्यम् । अखण्डोपकारे परस्परसापेक्षत्वात् TantrRaha. 64. 9; तत्राखण्डोपकारस्य समुच्चिताज्यभागप्रयाजादिसाध्यत्ववदिह ज्ञान-समुच्चितप्रमाणसाध्यत्वाभावात् Nyāyāmṛ. 624A. 11; एकविद्याकर्मान्वयिगुणाङ्गानाम-खण्डोपकाररूपप्रयोजनैक्यात् सर्वेषामपि तेषां ग्रहणं तावत् स्वरसतः प्राप्नोति S'ivārkaMaDī. ii. 291. 10 (*on* iii. 3. 5); ii. 291. 33 (*on* iii. 3. 5)

**अखण्डोपकारक** ( akhaṇḍopakāraka ) *adj.* who helps collectively अखण्डोपकारकमुखेन सर्वाङ्गविषयतया प्रवर्तमानस्य चोदकवाक्यस्य किञ्चिद् व्यति-रिक्ताङ्गविषयत्वं कल्पयितुं न शक्यते S'ivārkaMaDī. i. 143. 29 (*on* i. 1. 3)

**अखण्डोपकारसिद्धि** ( akhaṇḍopakāra–siddhi ) *f.* establishment of collective assistance तद्गुणानामेव सतामग्रहणे कथमखण्डोपकारसिद्धिः S'ivārka-MaDī. ii. 290. 19 (*on* iii. 3. 5)

**अखण्डोपदेश** ( akhaṇḍopadeśa ) *m.* teaching about the indivisible or absolute entity विशिष्टविषयादपि ज्ञानादखण्डोपदेशोपपत्तिः AdvaiSi. 707. 7.

**अखण्डोपाधि** ( akhaṇḍopādhi ) *m.* an indivisible property भिन्ना-भिन्नत्वस्यैवाखण्डोपाधेरवच्छेदकत्वाभ्युपगमात् VedāntRaMañ. 2. 7 ( 93. 2 ); अभावत्वमेव वानुगतप्रत्ययसिद्धोऽखण्डोप( ? पा )धिः भावत्वं वाखण्डोप( ? पा )धिः PadārthaTaNi. 49. 2-4; समवायत्वं तु पुनरनुगतमखण्डोपाधिरिति PadārthaTaNi. 76. 1-3; तेजश्चैतन्यसाधारणं च प्रकाशत्वमखण्डोपाधिः प्रकाशव्यवहारनियामकतया सिद्ध इति SāṁkhyaPraBh. 45. 13 (*on* 1. 88); 64. 20 (*on* 1. 145); जात्यखण्डो-पाध्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात् SiddhāMu. 31. 4 (*on* 58); अखण्डोपाध्यङ्गीकारे … पदार्थान्तरकल्पनानुपपत्तिः BhedaDhi. 93. 6; अन्यत्रैव स्वरूपसंबंधेन समवायत्वाभावत्वादिवत् सत्ताखण्डोपाधिर्वर्तते GuruCandr. i. 252. 20; LaCandr. 353. 39; विध्यादिषु चतुर्षु वैदिके च वक्ष्यमाणे अलौकिके धर्मे प्रवर्तनात्व-मखण्डोपाधिः…कल्प्यते MīmāKau. iiiA. 21. 16 (*on* i. 2. 7); iiiA. 25. 2 (*on* i. 2. 7); iiiA. 152. 4 (*on* ii. 2. 2); तच्च जातिरखण्डोपाधिर्वेत्यन्यदेतत् BhāṭṭDī. i. 86. 9 (*on* ii. 1. 2); i. 99. 10 (*on* ii. 1. 8); अधिष्ठानत्वं च भ्रमजनकाज्ञान-विषयत्वं वा अज्ञानविपयत्वं वा अखण्डोपाधिर्वा JñānBiPra. 26. 27; व्यापारसमुदाय-निष्ठोऽन्तिमव्यापारनिष्ठो वा वैजात्यमखण्डोपाधिर्वा सिद्धः पच्याद्यर्थः BhāṭṭCin. i. 77. 28 (*on* i. 1. 4); i. 81. 25 (*on* i. 1. 4); (said of देवी ) सखण्डोपाधिर-खण्डोपाधिश्चेति द्विविधैरपि धर्मैः शून्या LalitāSaBh. 63. 33 (*on* 97)

**अखण्डोपाधिरूप** ( akhaṇḍopādhi–rūpa ) *adj.* of the form of an indivisible property एवं कर्मत्वकर्तृत्वादिकमपि क्रियाजन्यफलशालित्वादिसमनियतं जातिरूपमखण्डोपाधिरूपं वा सामान्यमङ्गीकृत्य MīmāKau. iiiB. 18. 15 (*on* ii. 1. 5); iiiB. 32. 15 (*on* ii. 1. 5); शक्यतावच्छेदकम्…जातिरूपमखण्डोपाधिरूपं वा सामान्यम् BhāṭṭDī. ii. 120. 19 (*on* iv. 2. 10); ii. 224. 17 (*on* vi. 1. 4); कारकत्वम्…अखण्डोपाधिरूपं सामान्यमिति रत्नकोशकृतः BhāṭṭCin. i. 96 1 (*on* i. 1. 4); अखण्डोपाधिरूपं वा न तु प्रागभावप्रतियोग्यभावत्वरूपत्वम् GuruCandr. ii. 384. 13; प्रागभावध्वंसरूपघटाद्यवृत्तित्वस्याखण्डोपाधिरूपध्वंसत्वेऽभावात् Guru-Candr. ii. 420. 17; LaCandr. 566. 26; प्रतियोगिजनकाभावत्वरूपप्रागभावत्वेऽख-ण्डोपाधिरूपाभावत्वस्य लाघवेन प्रवेशात् GuruCandr. ii. 422. 13; LaCandr. 566. 36; 794. 20.

**अखण्डौषध** ( akhaṇḍauṣadha ) *n.* medicine that is indivisible, indivisible drug वैद्यादिशास्त्रस्याप्यौषधादिबुभुत्सायाम्…वैद्यादिशास्त्रमप्यखण्डौषधादि-परमित्यापाताच्च Nyāyāmṛ. 446A. 9; न च एवं सगुणवाक्यस्यापि ब्रह्मबुभुत्सायां कर्मकाण्डस्यापि कर्मबुभुत्सायां वैद्यकादिशास्त्रस्यापि औषधादिबुभुत्सायामखण्डब्रह्मा-खण्डकर्माखण्डौषधादिपरत्वं स्यादिति वाच्यम् AdvaiSi. 688. 9.

**अखण्ड्यमान** ( akhaṇḍya–māna ) *adj.* whose arrogance cannot be put down अखण्ड्यमानं परिखण्ड्य शक्रं त्वम्…नराभियोगम्…किं नयसे गुरुत्वम् Bhaṭṭi. 12. 17 ( comm. अच्छेद्याहंकारम् )

**अखण्ड्यमानप्रतिम** ( akhaṇḍyamāna–pratima ) *adj.* whose vow or meditation has not been broken अखण्ड्यमानप्रतिमः प्रतिमानविवर्जितः ।…त्रीन् मासान् विजहारोर्वीं छद्मस्थः परमेश्वरः TriṣaS'aPuC. iii. 6. 69 ( editor's note : प्रतिमाः तपोविशेषरूपाः अभिग्रहाः )

**अखन** ( a–khana ) *adj.* difficult to dig, difficult to cut into pieces न शक्यते खनितुं कुद्दालादिभिरपि, टङ्कैश्च छेत्तुं न शक्यः अखनः ChāndoUBh. 24. 1 (*on* i. 2. 7)

**अखनत्** ( á–khanat ) *adj.* not digging वनस्पतिं वन आस्थापयध्वं नि षू दधिध्वमखनन्त उत्सम् ṚV. x. 101. 11.

**अखननायाससुलभ** ( akhananāyāsa–sulabha ) *adj.* easy to get without exertion of digging निधिरखननायाससुलभः नृसिंहक्षोणीन्द्रो नयनपथ-मस्माकमगमत् Ekāva. 4. 6. (3) (142. 6); 6. 1. (46) (155. 7); 8. 36. (5) (280. 7)

**अखन्त** ( akhanta ) *n.* a fire-place अन्तिकायां त्वश्मन्तमश्मन्तकान्वितम् । अखन्तकमखन्तं च S'abdaRa.(Su.) 4. 59.

**अखन्तक** ( akhanta–ka ) *n.* a fire-place अन्तिकायां त्वश्मन्तमश्मन्त-कान्वितम् । अखन्तकमखन्तं च S'abdaRa.(Su.) 4. 59.

**अखर** ( a–khara ) *adj.* not hard, soft क्रीडनकैः … लघुभिरखरैरतीक्ष्णैः … विनोद्यमानः ( बालकः ) KāśyaS. 317A. 44; ( करीन्द्रः ) करेणुकायाः…स्पृशति च चलदक्षिपक्ष्मलेखं मुखमखरेण करेण रेणुदिग्धम् NalaCam. 6. 59; ViśvaPra. 78. 7.

**अखरक** ( akhara–ka ) *adj.* soft दृष्टमेभिः सारतरं मया लब्धमखरकमर्क-कर्करम्…मे मुक्ताजातमिदम् AvantiKa. 62. 9.

**अखरकर** ( akhara–kara ) *m.* the soft-rayed one, the moon उदेति… अखरकरोऽपि मण्डपिण्डः Manmatho. 425. 4 (1. 20)

**अखरदीधिति** ( akhara–dīdhiti ) *m.* the soft-rayed one, the moon अनुनिशादयितां हिमवालुकाप्रकरमास्यदिवाखरदीधितिः HammīMaKā. 7. 22.

**अखरु** ( a–kharu ) *m.* other than the word *kharu* गुणोक्तेरुतोऽखरुस्फोङः JaineVyā. iii. 1. 30; CāndraVyā. ii. 3. 43; गुणादुतोऽचोऽखरोः S'ākaṭāVyā. i. 3. 59; SiddhHe. ii. 4. 35; MugdhaBo. 4. 16 (42. 18)

**अखरोट** ( akharoṭa ) *m.* a walnut अक्षोटम् अखरोटः NirṇaSi. 289. 15.

**अखरौद** ( akharauda ) *m.* name of a place अखरौदसमीपे अगराग्रामः… पण्डितश्रीदेल्हणशर्मणे ब्राह्मणाय…प्रदत्तः EI. xxi. 95. 27.

**अखर्व** ( á–kharva ) *adj.* [ *f.* –ā ] [DEBRU p. 870] **A** not mutilated, perfect मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा ṚV. vii. 32. 13 ( Sāy. अनल्पम् ); **B** not shallow अञ्जलिना वा पिबेदखर्वेण वा पात्रेण TaiS. II. v. 1. 7 ( Sāy. unbaked (earthen vessel) अदग्धशरावादिः ); त्रिरात्रं रजस्वला-शुचिर्भवति । सा … अखर्वेण पात्रेण पिबेत् VasiDS. 5. 7; अखर्वेणाञ्जलिनायसेन वा पिबेत् VaikhāGS. 3. 9; VīraMi.(S'uddhi.) 11. 9; **C** high, tall स्याद-खर्वीश्रोणासप्तशफा (सोमक्रयणी) MaiS. iii. 7. 4; अखर्वपर्वतशिखरशेखरितान्तराम्… एकशृङ्गवैताढ्यपर्वतान्तरालाटवीं वीक्षमाणः…गगनवल्लभनगरमाससाद ( हरिवाहनः ) TilaMañ. 234. 3; अखर्वपर्वतश्रेणिविश्राणनविधिस्ततः CaturCin. i. 4. 15; वेत्रपुट-भेदनाधीशतिरुवेङ्कटनृपतिनन्दनः…अखर्वगम्भीराकृतिभिः…हूणयोधैः…अध्यासितानेक-लक्ष्योपलक्षितं प्रविश्य हूणराजभवनम्…पीठमध्यासांचक्रे ĀnandRa. 8. 0(39); **D** big अखर्वमौर्वाग्निमिवोदधेः प्लुतम् … ऐक्षिष्ट स चन्दनाचलम् Kapphiṇā. 6. 1; और्वोऽखर्वः सुधाम्भोधौ YaśasCam. i. 424. 7; पर्वतः । यः गन्धर्वाखर्वपर्वानक-निनदनदत्कन्दराभोगरम्यः YaśasCaṁ. ii. 228. 1; स्वदृशोर्जनयन्ति सान्त्वनां खुरकण्डूयनकैतवान्मृगाः । जितयोरुदयत्प्रमीलयोस्तदखर्वेक्षणशोभया भयात् NaiṣC. 2. 21; BālamBha. iii. 64. 31 (*on* 3. 20); **E** excessive, great अखर्वेण गर्वेण विराजमानो राजा … प्रतियोद्धुमना बभूव DaśKuC. 4. 6; ब्रह्मा … । अखर्वं सृष्टिगर्वं तं तत्याज GaṇeP. i. 14. 13; खर्वविनायकः । अखर्वानपि विघ्नौघा-न्भक्तानां खर्वयेत्सताम् SkandP. iv. 57. 65; ( यान् प्रश्नान् ) आकर्ण्यापि सुवर्णवर्ण-वदनं वैवर्ण्यमेति क्षणात् तस्याखर्वकुगर्वपर्वतशिरः प्रौढ्याधिरूढोऽत्र यः Golā 251. 12 (31. 1); अच्युतप्रभृतयोऽथ सुरेन्द्राः स्वामिनो मुनिजनस्य च तस्य । अग्निसंस्करण-